नामकुलविशिष्टस्य प्रथमां अथवा अन्यकुलीनानां मध्यांशनामकुलविशिष्टस्य वा द्वितीयां कन्यां गृह्णीयात् ॥ * ॥ अथ तेजोऽजनामकुलीनस्य द्वितीयपुत्त्रस्य कार्य्यम् । स आत्मतुल्याय अथवा वंशजाय प्रथमां कन्यां दद्यात् । मध्यांशनामकुलविशिष्टस्य द्वितीयपुत्त्रस्य प्रथमां कन्यां अथवा तेजोऽजनामकुलविशिष्टस्य द्वितीयां गृह्णीयात् ॥*॥ अथ मध्यश्रेष्ठनामकुलीनस्य कार्य्यम् । स मध्यश्रेष्ठपुत्त्रवारभायामध्यांशनामकुलीनाय प्रथमां मध्यांशकुलविशिष्टस्य द्वितीयपुत्त्राय तेजोऽजनामकुलीनाय द्वितीयां कन्यां दद्यात् । मुख्यकुलीनस्य चतुर्थीं कन्यां अथवा कनिष्ठकुलीनस्य प्रथमां कन्यां गृह्णीयात् । ततः तेजोऽजनामकुलविशिष्टस्य प्रथमां कन्यां गृह्णीयात् । ततः तेजोजानुजकुलीनस्य अग्रिमां कन्यां गृह्णीयात् ॥ * ॥ अथ मध्यश्रेष्ठपुत्त्रवारभायामध्यांशनामकुलीनस्य कार्य्यम् । स तेजोऽजनामकलयुक्ताय प्रथमां कन्यां दद्यात् । कनिष्ठकुलविशिष्टस्य अथवा छभायानामकुलयुक्तस्य किं वा मध्यश्रेष्ठकुलीनस्य प्रथमां कन्यां गृह्णीयात् । * ॥ अथ चतुस्त्रिंशदधिकसप्तदशशतशकाब्दे मत्पित्रा तावत्कुलीनकुलाचार्य्यमतेन मुख्यकुलीनस्य द्वितीयतृतीययोः कन्ययोः क्रमेण ग्रहणेन तदलाभे श्रौर्य्यकुले दानेन समानकुले ग्रहणेन च कनिष्ठछभायानामकुलयोः पुरुषानुक्रमेण स्थिरतरत्वं निर्णीतम् । तद्यथा,—

"कनिष्ठकुलवेश्मनि क्वचन केऽपि केऽपीच्छया
परेऽपि पुरुषत्रयादगमनेव दौच्छेयिकाम् ।
निषेधमिह नेच्छते कमपि तत्र षड्भ्रातृजः
सुतः पितृपदं कथं जननतो हि न प्राप्स्यति ॥
शाके सप्तपदर्त्तिसप्तवसुधागणे वरेण्ये तथा
मर्य्यादे परिपूरिते हि विषमे धन्ये त्रयोविंशके ।
गोपीमोहनदेववंशतिलकेनापूर्ब्बकं श्रीमता
निर्णीतं यदपीह तत्र घटकैः सर्व्वैः कुलीनैर्म्मतम् ॥
कनिष्ठषड्भ्रातृकुलस्य तद्वत्
स्वच्छेयिकायामिदमेव मूलम् ।
आदानतः पितृपदस्य लाभो
ज्येष्ठत्वभावः पुरुषक्रमेण ॥
छैयिकायामशक्तस्य दानचेत् प्रबलं भवेत् ।
पर्य्यायस्य समानस्य ग्रहणादपि तिष्ठति ॥
शौर्य्ये निन्दा समावेशस्त्रिविधोऽंशः कुलस्य वै
तस्य ध्वंसो न हि भवेद्यत्नतो रक्षितः स हि ।
अत्र यद्यन्यथाभावो भवेदपि यथाविधि ।
क्रमागतेषु वर्गेषु तदा हानिर्भविष्यति ॥
सर्व्वैः कुलज्ञैश्च कुलीनवर्गै-
र्गोष्ठीपतीनां पुरतः सहर्षैः ।
इदं हि पत्रं लिखितं प्रयत्नात्
निर्णीत एष प्रचलिष्यतीति" ॥ ० ॥

अथ वङ्गजकुलीनाः ।

"वसुवंशे च मुख्यौ द्वौ गाङ्गा कल्याणपूषणौ ।
घोषेषु च समाख्यतश्चतुर्भुजमहाकृती ॥
दशरथो गुहश्चैव मित्रस्तारापतिस्तथा" ॥

एतेषामादिपुरुषनिर्णयो यथा । गौतमगोत्रे सर्व्वादौ दशरथवसुसुतौ कल्याणवसुपरमवसुकौ कल्याणवसुदक्षिणराढ़े ख्यातस्तस्य सुतः भववसुः तत्सुतः हंसवसुः तत्सुताः शुक्तिमुक्तायलङ्कारवसुकाः । अलङ्कारवसुः राढ़ात् वङ्गे गतः तस्य वङ्गे कुलहानिर्जाता तस्य सुतः मधुवसुः तत्सुतः गुणाकरवसुः तत्सुता अनन्तादयः । दशरथसुतः परमवसुस्तत्सुतौ कल्याणवसुपूषणवसुकौ वङ्गे ख्यातौ । सौकालीनगोत्रे मकरन्दघोषसुतौ भवनाथघोषसुभाषितघोषौ भवनाथघोषो दक्षिणराढ़े ख्यातः सुभाषितघोषो वङ्गे ख्यातः तस्य सुतश्चतुर्भुजघोषः ॥ विश्वामित्रगोत्रे सर्व्वादौ कालिदासमित्रसुतौ अश्वपतिमित्रश्रीधरमित्रौ श्रीधरमित्रो दक्षिणराढ़े ख्यातः अश्वपतिमित्रो वङ्गे ख्यातस्तस्य सुतस्तारापतिमित्रः ॥ इति वङ्गकुलाचार्य्यग्रन्थः कुलदीपिका ॥

कुलीनकः, पुं, (कुलीन + संज्ञायां कन् ।) वनमुद्गः । इति हेमचन्द्रः ॥

कुलीनसं, क्ली, (कौ लीनं भूलग्नं द्रव्यादिकं स्यतीति । सो + कः ।) जलम् । इति हेमचन्द्रः ॥

कुलीरः, पुं, (कुल् संस्त्याने + ईरन् किच्च ।) कर्कटः । इत्यमरः । १ । १० । २१ ॥ काँकड़ा इति भाषा । ("अथ कुलीरप्रभृतयो जलजन्तवस्तमभ्युपेत्य प्रोचुः" । इति हितोपदेशः ॥) कर्कटराशिः इति ज्योतिषम् ॥

कुलीरशृङ्गी, स्त्री, (कुलीरावयव इव शृङ्गं यस्य । कुलीरशृङ्ग + गौरादित्वात् ङीष् ।) कर्कटशृङ्गीवृक्षः । इति रत्नमाला ॥

कुलीरादः, [द्] पुं, (कुलीरं अत्तीति । अद + क्विप् । उत्पत्तिमात्रेणैवात्मप्रसूतिभक्षणादस्य तथात्वम् ।) कर्कटशिशुः । तत्पर्य्यायः । स्नेगविः २ । इति त्रिकाण्डशेषः ॥

कुलीशः, पुं क्ली, (कुलिश + पृषोदरात् दीर्घः ।) कुलिशम् । इत्यमरटीकासारसुन्दरी ॥

कुलुकं, क्ली, (कुल् + बाहुलकात् उलच् किच्च निपातनात् लस्य कः ।) जिह्वामलम् । इति हेमचन्द्रः ॥

कुलुकगुञ्जा, स्त्री, (कौ भूमौ लुका गुप्ता गुञ्जा इव ।) उल्काग्निः । इति हारावली ॥

कुलेश्वरः, पुं, (कुलस्य जगत्समूहस्य कुलचक्रस्य वा ईश्वरः ।) शिवः । (कुलस्य वंशस्य ईश्वरः नेता कर्त्ता वा ।) कुलपतिः । इति शब्दमाला ॥

कुलोत्कटः, पुं, (कुले कुलेन वा उत्कटः उद्रिक्त उग्रो वा ।) कुलीनाश्वः । इति शब्दचन्द्रिका ॥ उत्कटकुलोद्भवे त्रि ॥

कुल्फः, पुं क्ली, (कल संख्याने "कलिगलिभ्यां फगस्योच्च" । उणां ५ । २६ । इति फक् अस्य उच्च ।) रोगः । गुल्फे पुं इत्युणादिकोषः ॥ (यथा, ऋग्वेदे ७ । ५० । २ । "यद्विजामन्पुरुषि वन्दनं भुवदष्ठीवन्तौ परिकुल्फौ च देहत्" ॥)

कुल्मलं, क्ली, (कुष् निष्कर्षे "कुषेर्लश्च" । उणां ४ । १८७ । इति कलन् लश्चान्तादेशः ।) पापम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, अथर्ववेदे २ । ३० । ३ ।
"तत्र मे गच्छताद्धवं शल्य इव कुल्मलं यथा" ॥)

कुल्माषं, क्ली, (कोलतीति । कुल् + क्विप् । ततः कुलं भक्तमिश्रितजलं मस्यतीति । मसीञ् परिणामे + अण् पृषोदरात् वत्वम् ।) काञ्जिकम् । इत्यमरः । २ । ९ । ३९ ॥

कुल्माषः, पुं, (कोलति इति । कुल् + क्विप् । कुल् अर्द्धस्विन्नो माषोऽस्मिन् ।) यावकः । इत्यमरः । २ । ९ । १८ । (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ॥
"कुल्माषा वातला रूक्षा गुरवो भिन्नवर्च्चसः" ॥)
वोरवधान्यम् । कुलत्थ इत्यन्ये । माषाकृतिचणः । काश्मीरेषु तुलसी इति ख्यातः इति सुभूतिः । इति भरतः ॥ राजमाष इत्यन्ये । इति मयनानन्दः ॥ माषादिमिश्रमर्द्धस्विन्नमन्नम् । खिचड़ी इति ख्यातश्च । इति लिङ्गादिसंग्रहटीकायां भरतः ॥ पाचितमाषादिरिति भीमः । इति सारसुन्दरी ॥ अर्द्धस्विन्नगोधूमचणकादयः । (यथा, शब्दार्थचिन्तामणौ ।
"अर्द्धस्विन्नास्तु गोधूमा अन्येऽपि चणकादयः ।
कुल्माषा इति कथ्यन्ते शब्दशास्त्रेषु पण्डितैः" ॥)
अस्य गुणाः । गुरुत्वम् । रूक्षत्वम् । वातकारित्वम् । मलभेदित्वञ्च । इति भावप्रकाशः ॥ रोगविशेषः । इति शब्दरत्नावली ॥ वनकुलत्थः । इति रत्नमाला ॥

कुल्माषाभिषुतं, क्ली, (कुल्माषैर्यवादिभिरर्द्धस्विन्नैरभिषूयते स्म इति । अभि + षु + क्तः ।) काञ्जिकम् । इत्यमरटीकायां स्वामी ॥

कुल्मासं, क्ली, (कोलतीति कुल् भक्तमिश्रितजलम् । तत् मस्यति परिणमयतीति अण् ।) कुल्माषम् । इत्यमरटीकायां भरतः ॥

कुल्यं, क्ली, (कुल् बन्धे + क्यप् ।) अस्थि । इत्यमरः । २ । ६ । ६८ ॥ अष्टद्रोणपरिमाणम् । सूर्पम् । आमिषम् । इति मेदिनी ॥

कुल्यः, त्रि, (कुलस्यापत्यम् । "अपूर्व्वपदादन्यतरस्यामिति" । ४ । १ । १४० । इति यत् । यद्वा कुले भवः कुलाय हितः कुले साधुः वा दिगादित्वात् तत्र साधुरिति वा यत् ।) कुलोद्भवः । कुलहितः । (यथा, भागवते ७ । ६ । १९ ।
"त्यजान् मनोज्ञोपरिच्छदांश्च
त्यक्तीश कुल्याः पशुभृत्यवर्गान्" ॥)
मान्ये पुं इति । मेदिनी ।

कुल्या, स्त्री, (कुले प्राणिगणे साधुः तत्र साधुरिति यत् ।) क्षुद्रा कृत्रिमा नदी । इत्यमरः । १ । १० । ३४ ॥ (यथा, शाकुन्तले १ माङ्के ।
"कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूलाः" ॥)
पयःप्रणाली । पयनाला इति भाषा । जीवन्तिकौषधिः । नदीमात्रम् । इति मेदिनी ॥ (यथा, महाभारते ३ पर्व्वणि ।
"सैन्धवारण्यमासाद्य कुल्यानां कुरु दर्शनम्" ॥)
कुलक्षी । इति हलायुधः ॥ स्थूलवार्त्ताकुः । इति रत्नमाला ॥